
मध्यप्रदेश संस्कृत बोर्ड



संस्कृतप्रबोधनी

मध्यप्रदेश संस्कृत बोर्ड
तुलसीनगरम्, भोपालम्



संस्कृतप्रबोधनी


मध्यप्रदेश संस्कृत बोर्ड
तुलसीनगरम्, भोपालम्

उदाहरणानुगु

उदा. 10.
1. 11.
2. 11.
3. 2.1
4. 3.3
5. 12.
6. 2.1
7. 4.5
8. 6.1
9. 9.(
10. 5.
11. 9.
12. 11
13. 12
14. 8.
15. 2
16. 7
17. 9
18. 3
19. 1
20. 1

अनुक्रमणिका:

क्र.सं.	पाठः	पृष्ठाङ्कः	क्र.सं.	पाठः	पृष्ठाङ्कः
1.	प्रथमः पाठः	1	20.	विंशतितमः पाठः	88
2.	द्वितीयः पाठः	9	21.	एकविंशतितमः पाठः	92
3.	तृतीय पाठः	13	22.	द्वाविंशतितमः पाठः	99
4.	चतुर्थः पाठः	23	23.	त्रयोविंशतितमः पाठः	103
5.	पञ्चमः पाठः	31	24.	चतुर्विंशतितमः पाठः	107
6.	षष्ठः पाठः	42	25.	पञ्चविंशतितमः पाठः	110
7.	सप्तमः पाठः	46	26.	षड्विंशतितमः पाठः	114
8.	अष्टमः पाठः	49	27.	सप्तविंशतितमः पाठः	117
9.	नवमः पाठः	51	28.	अष्टाविंशतितमः पाठः	120
10.	दशमः पाठः	57	29.	नवविंशतितमः पाठः	124
11.	एकादशः पाठः	59	30.	त्रिंशत्तमः पाठः	126
12.	द्वादशः पाठः	64	31.	एकत्रिंशत्तमः पाठः	128
13.	त्रयोदशः पाठः	69	32.	द्वात्रिंशत्तमः पाठः	130
14.	चतुर्दशः पाठः	73	33.	त्रयस्त्रिंशत्तमः पाठः	133
15.	पञ्चदशः पाठः	75	34.	चतुस्त्रिंशत्तमः पाठः	135
16.	षोडशः पाठः	78	35.	पञ्चत्रिंशत्तमः पाठः	137
17.	सप्तदशः पाठः	80	36.	षट्त्रिंशत्तमः पाठः	141
18.	अष्टादशः पाठः	82	37.	सप्तत्रिंशत्तमः पाठः	143
19.	नवदशः पाठः	85	38.	अष्टात्रिंशत्तमः पाठः	146



लक्ष्मण सिंह गौड़
मंत्री
मध्यप्रदेश शासन
उच्च शिक्षा एवं स्कूल शिक्षा

10, सिविल लाईन्स,
दूरभाष - निवास 2661294
मंत्रालय 2441347
फैक्स 2661295

सन्देश

भारतीय संस्कृति को अक्षुण्ण बनाये रखने में संस्कृत भाषा का महत्वपूर्ण योगदान है। संस्कृत विश्व की प्राचीनतम, समृद्ध एवं सरलतम भाषा है। संस्कृत भाषा और इसका साहित्य भारतीय संस्कृति का प्रमुख वाहक रहा है। प्राचीन संस्कृत ग्रंथों में अपार ज्ञान का भंडार भरा है। आज आवश्यकता है इसे जानने और समझने की।

यह हर्ष का विषय है कि म.प्र. संस्कृत बोर्ड, संस्कृत भाषा के उत्थान हेतु सकारात्मक पहल करते हुए 'संस्कृत प्रबोधिनी' का प्रकाशन कर रहा है।


संस्कृत शब्दों के अशुद्ध प्रयोग से बचने, उसके प्रभावपूर्ण और संगत उपयोग के लिए सहज और सरल भाषा में लिखी यह संदर्शिका प्रत्येक वर्ग का मार्गदर्शन करने में सफल होगी ऐसा मेरा मानना है। इसके उपयोग से संस्कृत भाषा जन-जन की वाणी बने ऐसी मेरी शुभकामना है।

मुझे आशा है कि म.प्र. संस्कृत बोर्ड, संस्कृत भाषा के उन्नयन विकास और इसके व्यापक प्रचार-प्रसार के लिए हर संभव इसी तरह के और भी प्रयास करता रहेगा।

'संस्कृत प्रबोधिनी' प्रकाशन हेतु साधुवाद एवं सफलता की शुभकामनाओं के संग।

(लक्ष्मण सिंह गौड़)

उदाहरणानु
उदा. 1(
1. 11
2. 11
3. 2.
4. 3.
5. 12
6. 2.
7. 4.
8. 6.
9. 9.(
10. 5.
11. 9.
12. 11
13. 12
14. 8.(
15. 2.(
16. 7.
17. 9.
18. 3.
19. 1(
20. 1.



डॉ. मनमोहन उपाध्यायः
उपाध्यक्षः (राज्यमंत्री दर्जा)
मध्यप्रदेश संस्कृत बोर्ड

कार्यालय : तुलसीनगरम् भोपालम्
(मध्यप्रदेशः)-462003
फोन- (0755) 2557563, 2766257
निवास : सीनियर एच.आई.जी.,
246 कटारा हिल्स, भोपाल
फोन- (0755) 2415768

सन्देशः

संस्कृतं भारतस्यसांस्कृतिकी भाषा वर्तते, वेदोपनिषद्पुराण महाभारतरामायणादयः सर्वेऽपि ग्रन्थाः संस्कृते एव निबद्धाः सन्ति। अस्माकं पूर्वजानां ऋषिमहर्षीणां तपोभिः अर्जिता ज्ञाननिधिः संस्कृतभाषायामेव निहिताऽस्ति। संस्कृतस्य अध्ययनेन एव भारतीय जीवनमूल्यानां ज्ञानविज्ञानपरम्परायाः च संरक्षणं संवर्धनं च भवितुमर्हति।

म.प्र. शासनेन विद्यालयीयशिक्षा, उच्चशिक्षा, आदिमजाति संस्कृतिधर्मस्वादि विभागेषु संस्कृतभाषायाः प्रचारप्रसारायोः विशेषावधानं दत्तमस्ति।

म.प्र. संस्कृतबोर्ड इत्यनेन संस्कृतशिक्षकाणां प्रशिक्षणं, संस्कृतपाठशालानां सुदृढ़ीकरणम्, संस्कृतच्छात्राणां, प्रोत्साहनं, विदुषां, सम्माननं जिलाप्रदेश अखिलभारतस्तरीयाः अनेके कार्यक्रमाः आरब्धाः सन्ति।

संस्कृतसंस्कृति संस्कारान् च संरक्षितुं संस्कृतबोर्ड द्वारा संस्कृतशिक्षणसंस्कारकेन्द्राणाम् अभिनवयोजना आरब्धा अस्ति, अनया संस्कृतस्य लोकव्यापीकरणं भविष्यति इति मन्ये।

संस्कृतप्रबोधिनीं पठित्वा पाठकाः लाभान्विताः भविष्यति इतिआशासे।

"हार्दिकाः शुभाशयाः"

उपाध्यायमन :

(डॉ. मनमोहन उपाध्यायः)

प्रथमः पाठः

परिचयः







मम नाम प्रत्यूषः।

भवतः नाम किम्?



मम नाम रमेशः।

भवतः नाम किम्?



मम नाम लता।

भवत्याः नाम किम्?



मम नाम सुधा

भवत्याः नाम किम्?



मम नाम गणेशः।

भवत्याः नाम किम्?



मम नाम माला।

भवतः नाम किम्?

उत्तरं लिखन्तु

भवतः नाम किम्? .....

भवत्याः नाम किम्? .....

प्रश्नं लिखन्तु

.....? मम नाम लीना।

.....? मम नाम विकासः।

उदाहरणानु

उदा. 10

1. 11

2. 11

3. 2.

4. 3.

5. 12

6. 2.

7. 4.

8. 6.

9. 9.

10. 5.

11. 9.

12. 11

13. 12

14. 8.

15. 2.

16. 7.

17. 9.

18. 3.

19. 1(

20. 1


एषः, सः




छात्रः

एषः छात्रः

सः युवकः



युवकः



सूर्यः

एषः सूर्यः

सः चन्द्रः




चन्द्रः



विवेकानन्दः

एषः .....

सः .....



रामकृष्णः



शिवः

..... शिवः

..... कृष्णः



कृष्णः



केशवः

.....

.....



माधवः



सिंह:



गज:

एषा, सा



छात्रा

एषा छात्रा

सा वृद्धा




वृद्धा



लता

एषा लता

सा पेटिका




पेटिका




कपाटिका

एषा .....

सा .....



द्विचक्रिका



छुरिका

..... छुरिका

..... माला



माला

उदाहरणानुगु

उदा. 10.

1. 11.

2. 11

3. 2.

4. 3.

5. 12

6. 2.

7. 4.

8. 6

9. 9

10. 5

11. 9

12. 1

13.

14.

15.


16.

17.

18.


19.

20.



घटी

....



कर्त्तरी




सरस्वती

....




नदी

एतत् - तत्




पुस्तकम् एतत् पुस्तकम् तत् उपनेत्रम्




उपनेत्रम्




कङ्कतम् एतत् कङ्कतम् तत् वातायनम्




वातायनम्



क्षुरपत्रम् एतत् ..... तत् .....



पादत्राणम्




मन्दिरम्

..... मन्दिरम्

..... लोकयानम्




लोकयानम्



व्यजनम्


.....

.....



सोपानम्

कः?, का?, किम्?




आरक्षकः

कः आरक्षकः?


एषः .....।

कः चषकः?

सः चषकः।



चषकः



दण्डः

.....?

.....।

.....?

.....।



नृपः



अजा

का अजा?

.....।

.....?

सा मक्षिका।



मक्षिका



नर्त्तकी

.....?

.....।

.....?

.....।



गृहिणी



छत्रम्

किम् छत्रम्?

.....।

.....?

तत् फलम्।



फलम्




पत्रम्

.....?

.....।

.....?

.....।



पर्णम्

अहम्, भवान्, भवती



अहं शिक्षिका,
भवान् कः?



अहं छात्रः।




अहं अध्यापकः,
भवती का?



अहं छात्रा।

भवान् कः?



अहं वैद्यः।

वैद्यः

अहं कुम्भकारः।



कुम्भकारः



आरक्षकः

.....। .....।



चोरः

उदाहरणानुगुणं

उदा. 10.1

1. 11.3

2. 11.3

3. 2.1

4. 3.3

5. 12.

6. 2.1

7. 4.

8. 6.

9. 9.

10. 5.

11. 9

12. 1

13. 1

14. 8

15. 2

16.

17.

18.

19.

20.

भवती का?



बालिका

अहं बालिका।

अहं महिला।



महिला



जननी

..... । ..... ।



पुत्री

चित्रानुगुणं रिक्तस्थानानि पूरयन्तु



अहं शिक्षकः



भवान् छात्रः




अहं वैद्या



भवती रुग्णा



..... भक्तः



..... देवः



..... स्थूला ..... कृशा



..... नृपः



..... सेवकः



..... गायिका




..... नर्तकी

द्वितीयः पाठः

आम् न किम्



किम् एषः बालकः? आम्



किम् एषः गजः? आम्



किम् एषः वानरः? न



किम् एतत् कदली फलम्? न



किम्, एषा अजा? आम्



किम् एषा छुरिका? न


कपिलः	छात्रः	✓	शिक्षकः	×
जानकी	माता	✓	भगिनी	×
गणेशः	दानवः	×	देवः	✓
राकेशः	राजनेता	✓	कर्मचारी	×
गीता	गायिका	×	नायिका	✓
सरोजिनी	नर्त्तकी	✓	छात्रा	×

द्वितीयः पाठः

आम् न किम्



किम् एषः बालकः? आम्



किम् एषः गजः? आम्



किम् एषः वानरः? न



किम् एतत् कदली फलम्? न



किम्, एषा अजा? आम्



किम् एषा छुरिका? न

कपिलः	छात्रः	✓	शिक्षकः	×
जानकी	माता	✓	भगिनी	×
गणेशः	दानवः	×	देवः	✓
राकेशः	राजनेता	✓	कर्मचारी	×
गीता	गायिका	×	नायिका	✓
सरोजिनी	नर्त्तकी	✓	छात्रा	×

कोष्ठकस्य साहाय्येन वाक्यानि लिखन्तु-

यथा-

1.	कपिलः छात्रः किम्?	आम्, कपिलः छात्रः।	सः शिक्षकः न।
2.	.....	.....	.....
3.	.....	.....	.....
4.	.....	.....	.....
5.	.....	.....	.....
6.	.....	.....	.....

अस्ति नास्ति



किम् एषः कपोतः अस्ति?
आम्, एषः कपोतः अस्ति।




किम् एषः वृक्षः अस्ति?
आम्, एषः वृक्षः अस्ति।




किम् एषः शिक्षकः अस्ति?
न, एषः शिक्षकः नास्ति।
एषः वैद्यः अस्ति।




किम् एतत् मुखम् अस्ति?
न, एतत् मुखं नास्ति।
एतत् नेत्रम् अस्ति।



किम् एतत् गृहम् अस्ति?
.....
.....



किम् एषा स्थालिका अस्ति?
.....
.....



किम् एषः गजः अस्ति?

.....

.....




किम एषः चन्द्रशेखर आजादः अस्ति।

.....

.....


अभ्यासः



चित्रं दृष्ट्वा 'अस्ति' अथवा 'नास्ति' इति लिखन्तु


घटी	अस्ति	पुष्पं	नास्ति
जङ्गमदूरवाणी	.....	फलम्	.....
कचोलः	.....	स्थालिका	.....
कपाटिका	.....	कपोतः	.....
पुस्तकम्	.....	वृक्षः	.....
लेखनी	.....	द्वारम्	.....

अत्र, तत्र, सर्वत्र, अन्यत्र, कुत्र?



लोकयानम् अत्र अस्ति।

कारयानं तत्र अस्ति।



सर्वत्र


वायुः सर्वत्र अस्ति। देवः सर्वत्र अस्ति।




वृक्षः अत्र अस्ति।
पर्वतः तत्र अस्ति।

अन्यत्र

'लालकिला' अन्यत्र अस्ति।
'ताजमहल्' अन्यत्र अस्ति।



गृहम् अत्र अस्ति?
मन्दिरं तत्र अस्ति।




पुष्पम्, खगः, वायुः, नदी, लेखनी, कन्दुकम्, पृथिवी, लालकिला,
आकाशः, ताजमहल्, वृक्षः, पत्रम्, देवः, तिरुपतिः, मरुस्थलम्

चित्रं दृष्ट्वा उदाहरणानुसारं प्रश्नोत्तराणि लिखन्तु

पुष्पं कुत्र अस्ति?	खगः कुत्र अस्ति?	वायुः कुत्र अस्ति?	ताजमहल् कुत्र अस्ति?
पुष्पम् अत्र अस्ति।	खगः तत्र अस्ति।	वायुः सर्वत्र अस्ति।	ताजमहल् अन्यत्र अस्ति
.....	.....	.....	.....
.....	.....	.....	.....
.....	.....	.....	.....
.....	.....	.....	.....
.....	.....	.....	.....
.....	.....	.....	.....

तृतीयः पाठः

तस्य, एतस्य




शिवः

एतस्य नाम शिवः।

तस्य नाम।



विष्णुः




गणेशः

.....।

.....।



कृष्णः



दयानन्दः

.....।

.....।



विवेकानन्दः



चन्द्रशेखर आजादः

.....।

.....।



भगतसिंहः



शिवराजः

.....।

.....।



प्रतापः



रामायणम्

.....।

.....।



महाभारतम्

उदाहरणानुगु

उदा. 10.

1. 11.

2. 11.

3. 2.1

4. 3.3

5. 12.

6. 2.1

7. 4.5

8. 6.1

9. 9.(

10. 5.

11. 9.

12. 1

13. 1

14. 8

15. 2

16.

17.

18.

19.

20.


(तस्याः, एतस्याः)



सरस्वती

एतस्याः नाम सरस्वती।

तस्याः नामः रमा




रमा



दुर्गा

.....।

.....।



महाकाली



सरोजिनी

.....।

.....।



इन्दिरा



लक्ष्मीबाई

.....।

.....।



निवेदिता



कल्पना चावला

.....।

.....।



पी.टी. उषा

उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु -

एषः छात्रः।	एतस्य नाम माधवः।
एषः गायकः।	..... नाम किशोरः।
एषः पाठकः ।	..... नाम दिनेशः।
एषः लेखकः ।	..... नाम हरिशङ्करः।
सः कृषकः ।	तस्य नाम रामप्रसादः।
सः लोहकारः।	..... नाम अशोकः।
सः शिक्षकः।	..... नाम नारायणः
सः देवः।	..... नाम रामः।
एषा इन्दिरा।	एतस्याः जनकः जवाहरलालः।
एषा पार्वती।	..... जनकः पर्वतः।
एषा लक्ष्मीः।	..... पतिः विष्णुः।
एषा मालाकारिणी।	..... नाम मञ्जुला।
सा परिचारिका।	तस्याः कार्यं सेवा।
सा वैद्या।	..... कार्यं चिकित्सा।
सा मधुमक्षिका।	..... कार्यं मधुसङ्ग्रहणम्।
सा वृद्धा।	..... बलं न्यूनम्।
एतत् नगरम्।	एतस्य नाम नर्मदापुरम्।
एतत् भवनम्।	..... नाम संस्कृतधाम।
तत् मन्दिरम्।	तस्य नाम अक्षरधाम।
तत् फलम्।	..... नाम आम्रम्।

उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु -

एषः महेशः।	कस्य नाम महेशः?	एतस्य नाम महेशः।
एषः रमेशः।	.....?	.....।
एषः रामस्वरूपः।	.....?	.....।
एतत् स्वप्नवासवदत्तम्।	.....?	.....।
एतत् उत्तररामचरितम्।	.....?	.....।
सः अरुणः।	.....?	तस्य नाम अरुणः।
सः कृष्णः।	.....?	.....।
सः विमलः।	.....?	.....।
तत् रामायणम्।	.....?	.....।
तत् महाभारतम्।	.....?	.....।
एषा सीता।	कस्याः नाम सीता?	एतस्याः नाम सीता।
एषा ललिता।	.....?	.....।
एषा रमा।	.....?	.....।
एषा आरती।	.....?	.....।
सा बेला।	.....?	तस्याः नाम बेला।
सा गौरी।	.....?	.....।
सा साक्षी।	.....?	.....।
सा पूजा।	.....?	.....।

मम, भवतः, भवत्याः

उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु

अहं बालकः।	मम नाम आशीषः।
अहं शिक्षकः।	..... कार्यं शिक्षणम्।
अहं राजनेता।	..... कार्यं देशसेवा।
अहं गीतकारिणी।	..... कार्यं गीतलेखनम्।
अहं रचना।	..... ध्येयं संस्कृतसेवा।
अहं रजकः।	..... कार्यं वस्त्रक्षालनम्।
अहं स्वयंसेवकः	..... लक्ष्यं देशस्य परमवैभवम्।
अहं युवकः।	..... बलम् अधिकम्।
अहं छात्रः।	..... शिक्षकः मनमोहनः।
अहं नदी।	..... वेगः अधिकः।

भवान् कृषकः।	भवतः कार्यं कर्षणम्।
भवान् मनीषः।	..... व्यवहारः उत्तमः।
भवान् हरीशः।	..... ज्ञानम् अधिकम्।
भवान् सुदीप्तः।	..... प्रकाशः सर्वत्र अस्ति।
भवान् आयुषः।	..... कार्यम् अध्ययनम्।
भवान् कुम्भकारः।	..... कार्यं घटनिर्माणम्।
भवान् गायकः।	..... नाम मुकेशः।
भवान् शिक्षकः	..... कार्यं पाठनम्।
भवान् ज्योतिषी	..... कार्यं भाग्यदर्शनम्।
भवान् गुरुः	..... कार्यं मार्गज्ञापनम्।

भवती शिक्षिका	भवत्याः कार्यं पाठनम्।
भवती गायिका	..... गानम्।
भवती रक्षिका	..... रक्षणम्।
भवती सुधा	..... शाटिका उत्तमा।
भवती लता	..... नाम उत्तमम्।
भवती माधवी	..... सखी राधा।

अवधानेन पठन्तु

षष्ठीविभक्तिः (पुंलिङ्गे)



पार्वती



शिवः



पार्वती शिव**स्य** पत्नी।



सत्यभामा



कृष्णः



सत्यभामा कृष्ण**स्य** पत्नी।



रामः



दशरथः



रामः दशरथ**स्य** पुत्रः।



भरतः



रामः



भरत**स्य** भ्राता रामः।



अरुन्धती



वशिष्ठः



अरुन्धती वशिष्ठ**स्य** पत्नी



लक्ष्मण:



उर्मिला



लक्ष्मण**स्य** पत्नी उर्मिला।

उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु

1.	बालक:	बालकस्य	6.	सूचक:	.....
2.	शिक्षक:	.....	7.	वादक:	.....
3.	गायक:	.....	8.	महेश:	.....
4.	यन्त्रकार:	.....	9.	शिष्य:	.....
5.	पत्रकार:	.....	10.	पुत्र:	.....

दशरथ:		राम:
शिव:		गणेश:
बिन्दुसार:	पुत्र:	अशोक:
वसुदेव:	पिता	कृष्ण:
राम:		लव:
भीम:		घटोत्कच:

कोष्ठकस्य अनुसारं उदाहरणं दृष्ट्वा वाक्यानि लिखन्तु

यथा- दशरथस्य पुत्र: राम:

1.	दशरथस्य पुत्र: राम:	1.	रामस्य पिता दशरथ:
2.	.....	2.	.....
3.	.....	3.	.....
4.	.....	4.	.....
5.	.....	5.	.....
6.	.....	6.	.....

उदाहरणानुगु

उदा. 10.

1. 11.

2. 11.

3. 2.1

4. 3.3

5. 12.

6. 2.1

7. 4.5

8. 6.1

9. 9.0

10. 5.5

11. 9.3

12. 11

13. 12

14. 8.(

15. 2.(

16. 7.

17. 9.

18. 3.

19. 1(

20. 1

षष्ठीविभक्तिः (स्त्रीलिङ्गे)



सीता



उर्मिला



सीतायाः भगिनी उर्मिला।



रमा



विष्णुः



रमायाः पतिः विष्णुः



सीता




लवः



सीतायाः पुत्रः लवः



सती



शिवः



सत्यायाः पतिः शिवः



गान्धारी




शकुनी



गान्धार्याः भ्राता शकुनी

उदाहरणानुसारं परिवर्तयन्तु -

1.	बालिका	बालिकाया:	6.	सूची	.....
2.	शिक्षिका	.....	7.	नदी	.....
3.	मापिका	.....	8.	वेल्लनी	.....
4.	पत्रिका	.....	9.	पार्वती	.....
5.	ध्वनिमुद्रिका	.....	10.	गौरी	.....



उदाहरणानुसारं कोष्ठकं दृष्ट्वा वाक्यानि लिखन्तु-

1.	इन्दिराया: माता कमला।	2.	कमलाया: पुत्री इन्दिरा।
3.	.....	4.	.....
5.	.....	6.	.....
7.	.....	8.	.....
9.	.....	10.	.....
11.	.....	12.	.....


उदाहरणानुसारं षष्ठ्यन्तरूपाणि लिखन्तु -

1.	वसुदेवः	वसुदेवस्य	पुत्रः
2.	गर्गः	.....	यजमानः
3.	बलरामः	.....	भ्राता
4.	नन्दः	.....	पुत्रः
5.	देवकी	.....	पुत्रः
6.	यशोदा	.....	पुत्रः
7.	अर्जुनः	.....	सखा
8.	द्वारिका	.....	नृपः
9.	कंसः	.....	संहारकः
10.	शिशुपालः	.....	संहारकः

श्रीकृष्ण

चतुर्थः पाठः

आवश्यकम्, मास्तु, पर्याप्तम्



विक्रेता -भोः किम्, आवश्यकम्?

ग्राहिका -धौतवस्त्रम् आवश्यकम्।

विक्रेता -चौलवस्त्रम् आवश्यकं किम्?

ग्राहिका -मास्तु। धौतवस्त्रम् आवश्यकम्।

विक्रेता -स्वीकरोतु।

ग्राहिका -एतत् धौतवस्त्रम् मास्तु, अन्यत् ददातु।

विक्रेता -स्वीकरोतु। अन्यत् किं ददामि?

ग्राहिका -पर्याप्तम्। किमपि मास्तु।

उदाहरणानुसारं वाक्यानि लिखन्तु -

1. पिपासा अस्ति। — जलम् आवश्यकम्।
2. बुभुक्षा अस्ति। — भोजनम् .....।
3. .....। — .....।
4. .....। — .....।
5. .....। — .....।
6. तपैदिकरोगः अस्ति। — धूम्रपानं मास्तु।
7. .....। — .....।
8. .....। — .....।
9. .....। — .....।
10. .....। — .....।
11. अस्वास्थ्यम् अस्ति। — औषधं पर्याप्तम्।
12. .....। — .....।
13. .....। — .....।
14. .....। — .....।
15. .....। — .....।

उदाहरणानुगु

उदा. 10.

1. 11.

2. 11.

3. 2.1

4. 3.3

5. 12.

6. 2.1

7. 4.5

8. 6.1

9. 9.(

10. 5.

11. 9.

12. 11

13. 12

14. 8

15. 2

16. 7


17. 9

18. 3

19. 1

20. 1

चित्राधारेण एकं सम्भाषणं लिखन्तु -



सेवक: .....

ग्राहक: .....

सेवक: .....

ग्राहक: .....

सेवक: .....

ग्राहक: .....

सेवक: .....


ग्राहक: .....

क्रिया


ध्यानेन पठन्तु




पठति



लिखति



खादति



पिबति



नयति



दर्शयति



प्रक्षालयति



क्षिपति



स्नाति



क्रीडति



हसति



नमति



ददाति



स्वीकरोति



क्रीणाति



विक्रीणाति




पतति



उत्तिष्ठति




उपविशवति



स्थापयति




हसति



श्रुणोति



गच्छति



आगच्छति

उदाहरणानुसारं वाक्यानि लिखन्तु -



गायकः



लेखकः



श्रोता



बालकः

गायकः गायति। ....



महेशः

.....



बालकः

.....



बालकः

.....



नर्त्तकः

.....



नृपः

.....



निर्धनः

.....



ग्राहकः

.....



विक्रेता

.....



पत्रम्

.....




वानरः

.....



बालकः

.....



शिशुः

.....



बालकः

.....



माता

.....



कर्मकरः


.....



नरः

.....

प्रार्थनात्मक क्रिया



आगच्छतु



उपविशतु




खादतु



पिबतु




स्वीकरोतु



पश्यतु



तिष्ठतु



पुनः आगच्छतु

एतेषां क्रियापदानां प्रार्थनारूपाणि/आज्ञारूपाणि लिखन्तु

यथा-

1.	पठति -	पठतु	11.	स्मरति	.....
2.	गच्छति -	.....	12.	उत्तिष्ठति	.....
3.	उपविशति	.....	13.	खादति	.....
4.	आगच्छति	.....	14.	पिबति	.....
5.	लिखति	.....	15.	क्षिपति	.....
6.	वदति	.....	16.	ददाति	.....
7.	पश्यति	.....	17.	स्वीकरोति	.....
8.	नयति	.....	18.	नमति	.....
9.	आनयति	.....	19.	करोति	.....
10.	श्रृणोति	.....	20.	क्षिपति	.....

एषः, एषा, सः, सा, तत्, एतत्, भवान्, भवती

एतैः शब्दैः सह आज्ञा रूपाणि लिखन्तु-

यथा-

एषः पठतु।	सा चलतु।
..... खादतु।	तत् .....।
.....।	.....।
.....।	.....।
.....।	.....।
.....।	.....।
.....।	.....।



अहं गच्छामि



अहम् उपविशामि



अहं खादामि



अहं पिबामि



अहं पठामि




अहं करोमि



अहं ददामि



अहं स्वीकरोमि



अहम् आगच्छामि



अहं वदामि



अहं श्रणोमि



अहं क्रीडामि



अहं लिखामि



अहं स्नामि



अहम् उस्तिष्ठामि

उदाहरणानुसारं परिवर्तयन्तु-

1. गच्छति - गच्छामि।
2. लिखति .....
3. वदति .....
4. श्रुणोति .....
5. कूर्दति .....
6. नयति .....
7. पतति .....
8. नयति .....
9. आनयति .....
10. हसति .....
11. क्रीणाति .....
12. विक्रीणाति .....

उदाहरणानुसारं वाक्यानि परिवर्तयन्तु-

1. सः पश्यति। अहं पश्यामि।
2. एषः चलति। .....।
3. सा नयति। .....।
4. सा गच्छति। .....।
5. एषा आगच्छति। .....।
6. भवान् खादति। .....।
7. भवान् अर्चति। .....।
8. भवान् यच्छति। .....।
9. भवान् ददाति। .....।
10. भवती नृत्यति। .....।
11. भवती गायति। .....।
12. एषा प्रक्षालयति। .....।
13. सः भ्रमति। .....।
14. एषः स्मरति। .....।

पञ्चमः पाठः

बहुवचनम्

ध्यानेन पठन्तु



बालकः



बालकाः




नर्त्तकः



नर्त्तकाः



वानरः




वानराः



सिंहः



सिंहाः







एषः चषकः



सः कलशः








एते चषकाः



ते कलशाः



उदाह

उदा.

1.

2.

3.

4.

5.

6.


7.

8

9

1

1



एषः कचोलः



सः आसन्दः






एते कचोलाः



ते आसन्दाः






एषः पर्वतः



सः कच्छपः







एते पर्वताः



ते कच्छपाः






एषः घटः



सः वृक्षः



.....घटाः




.....वृक्षाः




एषः देवालयः



सः स्यूतः



.....



.....

उदाहरणानुसारं परिवर्तयन्तु-

1.	एषः छात्रः	एते छात्राः
2.	एषः गायकः	.....
3.	एषः वादकः	.....
4.	एषः शृगालः	.....
5.	एषः शशकः	.....
6.	एषः सुधाखण्डः	.....
7.	एषः दीपः	.....
8.	एषः कपाटः	.....
9.	सः दर्पणः	ते दर्पणाः
10.	सः वैद्यः	.....
11.	सः मार्जकः	.....
12.	सः पादपः	.....
13.	सः सन्देशः	.....
14.	सः कटाहः	.....
15.	सः श्यामपट्टः	.....
16.	सः दण्डः	.....
17.	कः लेखः?	के लेखाः?
18.	कः आपणः?	.....
19.	सः कूर्मः?	.....
20.	कः मूषकः?	.....


ध्यानेन पठन्तु




बालिका




बालिकाः




छुरिका




छुरिकाः




स्थालिका



स्थालिकाः




कर्त्तरी




कर्त्तर्यः




एषा सिक्थवर्तिका




सा लेखनी



एताः .....




ताः .....





एषा वेल्लनी सा देवी





....





एषा द्रोणी सा गृहगोधिका






....



..... कपाटिका: ..... दूरवाणी







....



1. एषा बालिका	एता: बालिका:	11. सा वैद्या	ता: वैद्या:
2. एषा महिला	.....	12. सा रुग्णा	.....
3. एषा छात्रा	.....	13. सा बाला	.....
4. एषा शिक्षिका	.....	14. सा वृद्धा	.....
5. एषा लेखिका	.....	15. सा कृशा	.....
6. एषा गायिका	.....	16. सा पाचिका	.....
7. एषा नर्त्तकी	.....	17. का पुत्री?	का: पुत्र्य:?
8. एषा देवी	.....	18. का नारी?	.....
9. सा जननी	.....	19. का गृहणी?	.....
10. सा स्वामिनी	.....	20. का अभिनेत्री?	.....



फलम्



फलानि



पर्णम्




पर्णानि



पुष्पम्




पूष्पाणि



पुस्तकम्




पुस्तकानि



एतत् कन्दुकम्




तत् छत्रम्



एतानि कन्दूकानि





तानि छत्राणि



एतत् चक्रम्


तत् व्यजनम्






एतानि.....

तानि.....






एतत् आम्रम्


तत् उपनेत्रम्






..... आम्राणि

..... उपनेत्राणि







एतत् दाडिमम्



तत् क्षुरपत्रम्



....



उदाहरणानुसारं परिवर्तयन्तु

1. एतत् फलम्	एतानि फलानि।	11. तत् मन्दिरम्	.....
2. एतत् व्यजनम्	.....	12. तत् गृहम्	.....
3. एतत् आम्रम्	.....	13. तत् छत्रम्	.....
4. एतत् करांशुकम्	.....	14. तत् सिंहासनम्	.....
5. एतत् पादांशुकम्	.....	15. तत् यानम्	.....
6. एतत् हृदयम्	.....	16. तत् विमानम्	.....
7. एतत् आलुकम्	.....	17. किं पात्रम्?	कानि पात्राणि?
8. एतत् क्रीडनकम्	.....	18. किं वस्त्रम्?	.....
9. तत् पुष्पम्	तानि पुष्पाणि।	19. किं नाणकम्?	.....
10. तत् कमलम्	.....	20. किं पुष्पम्?	.....

एकवचनम् अथवा बहुवचनं लिखन्तु-

1. पुस्तकम् .....
2. ..... एतानि द्वाराणि
3. .....तत् वातायनम्
4. ..... कानि फलानि
5. एतत् पुष्पम् .....
6. ..... तानि व्यजनानि
7. किम् यानम्? .....
8. ..... एतानि पत्राणि
9. एतत् जलम् .....
10. ..... तानि यन्त्राणि

1. गणेशः .....
2. ..... एते छात्राः
3. एषः सुधारखण्डः .....
4. ..... के वैद्याः
5. सः कृष्णः .....
6. ..... एते पौराः
7. कः अध्यापकः .....
8. ..... ते नेवारः
9. एषः दाता .....
10. ..... ते भ्रातरः

1. लता .....
2. ..... एताः नद्यः
3. एषा स्थालिका .....
4. ..... काः शिक्षिकाः?
5. सा वाटिका .....
6. ..... ताः कर्तर्यः
7. का पार्वती .....
8. ..... एताः वाप्यः
9. सा कूपी .....
10. ..... ताः द्रोण्यः

अवधेयम्

सम्यक् स्मरन्तु

	एकवचनम्	बहुवचनम्	
एते प्रश्नवाचकाः	कः	के	पुंलिङ्गे
	का	काः	स्त्रीलिङ्गे
	किम्	कानि	नपुंसकलिङ्गे

षष्ठः पाठः

अहं, वयम्

ध्यानेन पठन्तु



अहम्



वयम्




अहं शिक्षकः



वयं शिक्षकाः



अहं युवकः



वयं युवकाः

उदाहरणानुसारं वाक्यानि लिखन्तु

यथा- 1. अहं लेखकः। वयं लेखकाः।

2. अहं पाठकः। .....।

3. अहं भारतीयः। .....।

4. अहं संस्कृतसेवकः। .....।

5. अहं शिक्षकः। .....।

6. अहं शिक्षिका। .....।

7. अहं गायिका। .....।

8. अहं विदुषी। .....।

9. अहं सुन्दरी। .....।


10. अहं नायिका। .....।

(भवान्-भवन्तः)

ध्यानेन पठन्तु



भवान् शिक्षकः



भवन्तः शिक्षकाः




भवान् कुम्भकारः



भवन्तः कुम्भकाराः



भवान् वृद्धः



भवन्तः वृद्धाः

उदाहरणं दृष्ट्वा वाक्यानि लिखन्तु

1. भवान् छात्रः भवन्तः छात्राः।

2. भवान् गायकः .....।

3. भवान् नायकः .....।

4. भवान् पाठकः .....।

5. भवान् वाचकः .....।

6. भवान् गणेशः .....।


7. भवान् लोहकारः .....।

8. भवान् कुम्भकारः .....।

9. भवान् मालाकारः .....।

10. भवान् जनकः .....।

भवती - भवत्यः



भवती अध्यापिका




भवत्यः अध्यापिकाः



भवती वैद्या



भवत्यः वैद्याः



भवती नर्तकी









भवत्यः नर्तक्यः







उदाहरणानुसारं वाक्यानि रचयन्तु

1. भवती महिला — भवत्यः महिलाः
2. भवती बालिका — .....
3. भवती आरक्षिका — .....
4. भवती सेविका — .....
5. भवती पाठिका — .....
6. भवती चञ्चला — .....
7. भवती ज्येष्ठा — .....
8. भवती जननी — .....
9. भवती पुत्री — .....
10. भवती कर्मकरी — .....

सप्तमः पाठः

सङ्ख्याः

1		एकम्
2		द्वे
3		त्रीणि
4		चत्वारि
5		पञ्च
6		षट्
7		सप्त
8		अष्ट
9		नव
10		दश

11		एकादश
12		द्वादश
13		त्रयोदश
14		चतुर्दश
15		पञ्चदश
16		षोडश
17		सप्तदश
18		अष्टादश
19		नवदश
20		विंशतिः

21. एकविंशतिः
22. द्वाविंशतिः
23. त्रयोविंशतिः
24. चतुर्विंशतिः
25. पञ्चविंशतिः
26. षड्विंशतिः
27. सप्तविंशतिः
28. अष्टाविंशतिः
29. नवविंशतिः
30. त्रिंशत्
31. एकत्रिंशत्
32. द्वात्रिंशत्
33. त्रयस्त्रिंशत्
34. चतुस्त्रिंशत्
35. पञ्चत्रिंशत्
36. षड्त्रिंशत्
37. सप्तत्रिंशत्
38. अष्टात्रिंशत्
39. नवत्रिंशत्
40. चत्वारिंशत्
41. एकचत्वारिंशत्
42. द्विचत्वारिंशत्
43. त्रिचत्वारिंशत्
44. चतुश्चत्वारिंशत्
45. पञ्चचत्वारिंशत्
46. षट्चत्वारिंशत्
47. सप्तचत्वारिंशत्
48. अष्टचत्वारिंशत्
49. नवचत्वारिंशत्
50. पञ्चाशत्
51. एकपञ्चाशत्
52. द्विपञ्चाशत्
53. त्रिपञ्चाशत्
54. चतुश्पञ्चाशत्
55. पञ्चपञ्चाशत्
56. षट्पञ्चाशत्
57. सप्तपञ्चाशत्
58. अष्टपञ्चाशत्
59. नवपञ्चाशत्
50. षष्टिः
61. एकषष्टिः
62. द्विषष्टिः
63. त्रिषष्टिः
64. चतुष्षष्टिः
65. पञ्चषष्टिः
66. षट्षष्टिः
67. सप्तषष्टिः
68. अष्टषष्टिः
69. नवषष्टिः
70. सप्ततिः
71. एकसप्ततिः
72. द्विसप्ततिः
73. त्रिसप्ततिः
74. चतुस्सप्ततिः
75. पञ्चसप्ततिः
76. षट्सप्ततिः
77. सप्तसप्ततिः
78. अष्टसप्ततिः
79. नवसप्ततिः
80. अशीतिः
81. एकाशीतिः
82. द्व्यशीतिः
83. त्र्यशीतिः
84. चतुरशीतिः
85. पञ्चाशीतिः
86. षडशीतिः
87. सप्ताशीतिः
88. अष्टाशीतिः
89. नवाशीतिः
90. नवतिः
91. एकनवतिः
92. द्विनवतिः
93. त्रिनवतिः
94. चतुर्नवतिः
95. पञ्चनवतिः
96. षण्णवतिः
97. सप्तनवतिः
98. अष्टनवतिः
99. नवनवतिः
100. शतम्
1,000 सहस्रम्
1,00,000 लक्षम्
1,00,00,000 कोटिः

अभ्यासः

अधोदत्तसङ्ख्याः शब्देषु लिखन्तु

5. **पञ्च**	9.	21.	57.....	23. .....
83.	92.	95.	82.....	42. .....
71.	63.	59.	48.	53. .....
90.	18.	25.	38.....	55. .....

उदाहरणानुसारं लिखन्तु


1. पञ्चपञ्चाशत् **55**	2. द्विषष्ठिः	3. नवदश	4. द्वाविंशतिः .....
5. चतुस्त्रिंशत्	6. नवपञ्चाशत्.....	7. शतम्	8. नवाशीतिः .....
9. अष्टपञ्चाशत्	10. विंशतिः.....	11. द्वादश	12. अशीतिः.....
13. नवनवतिः.....	14. द्व्यशीतिः.....	15. एकानवतिः.....	16. नवचत्वारिंशत....

अष्टमः पाठः


सन्ति, कति




बालकः अस्ति।




बालकाः सन्ति।




माला अस्ति।



मालाः सन्ति।




पुस्तकम् अस्ति



पुस्तकानि सन्ति।

बहुवचने परिवर्तयन्तु

1.	सुदाखण्डः अस्ति।	सुदाखण्डाः सन्ति।
2.	छात्रः अस्ति।	.....
3.	भवान् अस्ति।	.....
4.	सः अस्ति।	.....
5.	एषः अस्ति।	.....
6.	शिक्षिका अस्ति।	.....
7.	मापिका अस्ति।	.....
8.	नर्तकी अस्ति।	.....
9.	भवती अस्ति।	.....
10.	फलम् अस्ति।	.....
11.	व्यजनम् अस्ति।	.....
12.	उपनेत्रम् अस्ति।	.....



तालाः सन्ति

कति तालाः सन्ति?


पञ्चतालाः सन्ति।



कति फलानि सन्ति?


पञ्चफलानि सन्ति।

उपर्युक्त उदाहरणानुसारं प्रश्नं लिखन्तु




.....?

पञ्चलेखन्यः सन्ति।




.....?

पञ्च अङ्कन्यः सन्ति।




.....?

पञ्चचषकाः सन्ति।



.....?

पञ्चपुस्तकानि सन्ति।




.....?


पञ्चपुष्पाणि सन्ति।

नवमः पाठः


सप्तमीविभक्तिः (पुंलिङ्गे, नपुंसकलिङ्गे)



जलम्




घटः




जलं घटे अस्ति।




रुग्णः




पर्यङ्कः




रुग्णः पर्यङ्के अस्ति।




भोजपालम्




मध्यप्रदेशः




भोजपालं मध्यप्रदेशे अस्ति।



पाठः



पुस्तकम्



पाठः पुस्तके अस्ति।

निम्नशब्दानाम् उदाहरणानुसारं सप्तमीविभक्तेः रूपं लिखन्तु

1.	कक्षः	कक्षे	11.	आसन्दः	.....
2.	ग्रन्थः	.....	12.	कुटीरः	.....
3.	चषकः	.....	13.	फलम्	.....
4.	कचोलः	.....	14.	जलम्	.....
5.	घटः	.....	15.	व्यजनम्	.....
6.	बालकः	.....	16.	यानम्	.....
7.	ग्रामः	.....	17.	वाहनम्	.....
8.	मार्गः	.....	18.	गृहम्	.....
9.	वृक्षः	.....	19.	चित्रम्	.....
10.	नीडः	.....	20.	पुष्पम्	.....

पुस्तकं	स्यूतः	
जलं	चषकः	
फलं	वृक्षः	अस्ति
घटी	हस्तः	
आपणः	नगरम्	
सिंहः	वनम्	

कोष्ठकाधारेण वाक्यानि लिखन्तु

यथा- पुस्तकं स्यूते अस्ति।

.....

.....

.....

.....

.....

उदाहरणानुगुणं वाक्यानि लिखन्तु-

1. जनाः (मार्गः) चलन्ति। — जनाः **मार्गे** चलन्ति
2. छात्राः (विद्यालयः) पठन्ति। — .....
3. वृद्धा (आसन्दः) उपविशति। — .....
4. चटका (नीडः) निवसति। — .....
5. मुनिवरः (कुटीरः) वसति। — .....
6. चन्द्रः (गगनम्) शोभते। — .....
7. मूर्तिः (मन्दिरम्) अस्ति। — .....
8. मत्स्याः (जलम्) तरन्ति। — .....


सप्तमीविभक्तिः (स्त्रीलिङ्गे)




पुष्पम्




लता




पुष्पं लता**यां** अस्ति




रोटिका



स्थालिका



रोटिका स्थालिका**याम्** अस्ति



नौका



नदी



नौका नद्यां अस्ति



कपोतः



शाखा



कपोतः शाखायाम् उपविशति।

निम्नशब्दानाम् उदाहरणानुसारं सप्तमीविभक्तेः रूपाणि लिखन्तु

1.	पाठशाला	पाठशालायाम्	11.	स्थाली	.....
2.	मेला	.....	12.	अङ्कनी	.....
3.	दोला	.....	13.	लेखनी	.....
4.	गौशाला	.....	14.	राजधानी	.....
5.	शलाका	.....	15.	भगिनी	.....
6.	पत्रिका	.....	16.	नर्त्तकी	.....
7.	गायिका	.....	17.	सूची	.....
8.	रमा	.....	18.	गृहिणी	.....
9.	नौका	.....	19.	दर्वी	.....
10.	उत्पीठिका	.....	20.	कर्त्तरी	.....

चटकः	शाखा	
छात्रः	पाठशाला	
कृष्णः	मथुरा	
रामः	अयोध्या	अस्ति
नौका	नदी	
सूची	घटी	
जलं	कूपी	

कोष्टकाधारेण वाक्यानि लिखन्तु-

यथा- चटकः शाखायाम् अस्ति।

.....

.....

.....

.....

.....

उदाहरणानुगुणं वाक्यानि लिखन्तु

1. महाराजः (राजसभा) मिलति। महाराजः राजसभायां मिलति।
2. पुष्पाणि (माला) सन्ति। .....।
3. वस्त्राणि (कपाटिका) भवन्ति। .....।
4. पुस्तकानि (उत्पीठिका) सन्ति। .....।
5. बालाः (शाला) पठन्ति। .....।
6. जनाः (नौका) उपविशन्ति। .....।
7. मत्स्याः (नदी) तरन्ति। .....।
8. नाम (सूची) अस्ति। .....।
9. विश्वनाथः (काशी) अस्ति। .....।
10. महाकालः (उज्जयिनी) अस्ति। .....।

सप्तमीविभक्तिः (बहुवचनम्)

उदाहरणानुगुणं रूपाणि लिखन्तु

अकारान्तपुलिङ्गे		**एकवचनम्**	**बहुवचनम्**
उदा.	बालः	बाले	बालेषु
	देवः	.....	.....
	पाठकः	.....	.....
	ग्रामः	.....	.....
	नायकः	.....	.....
	ग्रन्थः	.....	.....

अकारान्तनपुंसकलिङ्गे

उदा.	छत्रम्	छत्रे	छत्रेषु
	फलम्	.....	.....
	पुस्तकम्	.....	.....
	पत्रम्	.....	.....
	पर्णम्	.....	.....
	गृहम्	.....	.....

आकारान्तस्त्रीलिङ्गे

उदा.	माला	मालायाम्	मालासु
	शाला	.....	.....
	बाला	.....	.....
	गीता	.....	.....
	ऊर्मिला	.....	.....
	लेखिका	.....	.....

ईकारान्तस्त्रीलिङ्गे

उदा.	सूची	सूच्याम्	सूचीषु
	नदी	.....	.....
	पार्वती	.....	.....
	घटी	.....	.....
	कर्तरी	.....	.....
	नर्त्तकी	.....	.....

अवधेयम्

रूपाणि स्मरन्तु

शब्दः	**सप्तमीविभक्तिः एकवचनम्**	**बहुवचनम्**
सः	तस्मिन्	तेषु
एषः	एतस्मिन्	एतेषु
सा	तस्याम्	तासु

एषा	एतस्याम्	एतासु
तत्	तस्मिन्	तेषु
एतत्	एतस्मिन्	एतेषु
भवान्	भवति	भवत्सु
भवती	भवत्याम्	भवतीषु
अहम्	मयि	अस्मासु

दशमः पाठः

कदा

वाक्यानि परिशीलयन्तु

1. आयुषः **कदा** विद्यालयं गच्छति?
   आयुषः **प्रातःकाले** विद्यालयं गच्छति।
2. माता **कदा** मन्दिरं गच्छति?
   माता **सायङ्काले** मन्दिरं गच्छति।
3. देवेशः **कदा** उत्तिष्ठति?
   देवेशः **पञ्चवादने** उत्तिष्ठति।

एतेषाम् उत्तराणि लिखन्तु

1. सूर्योदयः कदा भवति?
   .....
2. जनाः कदा शयनं कुर्वन्ति?
   .....
3. भवान्/भवती कदा भोजनं करोति?
   .....

एतेषाम् उत्तराणां प्रश्नं लिखन्तु-

1. योगेशः पञ्चवादने योगाभ्यासं करोति।
   .....
2. मालती सप्तवादने पूजनं करोति।
   .....

3. रचना मध्याह्ने विश्रामं करोति।

.....


4. कीर्तिः एकादशवादने भोजनं पचति।

.....

5. गान्धीजयन्ती अक्टोबरमासे भवति।

.....

अद्य, श्वः परश्वः प्रपरश्वः
ह्यः, परह्यः, प्रपरह्यः



गुरुवासरः

शुक्रवासरः

शनिवासरः

रविवासरः

सोमवासरः

मङ्गलवासरः

बुधवासरः

रिक्तानि स्थलानि पूरयन्तु

अद्य गुरुवासरः

..... बुधवासरः

..... मङ्गलवासरः

..... सोमवासरः

..... शुक्रवासरः

..... शनिवासरः

..... रविवासरः

उदाहणानुसारं प्रश्नस्य उत्तरं लिखन्तु


1. अद्य नवम्बर् मासस्य त्रयोदशदिनाङ्कः।
   बालदिवसः कदा?
   बालदिवसः श्वः।
2. अद्य सेप्टेम्बर् मासस्य षष्ठदिनाङ्कः। शिक्षकदिवसः कदा?
   .....।
3. अद्य अगस्ट् मासस्य त्रयोदशदिनाङ्कः, स्वातन्त्र्यदिवसः कदा?
   .....।
4. अद्य जनवरी मासस्य अष्टाविंशतिदिनाङ्कः, गणतन्त्रदिवसः कदा?
   .....।

एकादशः पाठः

क्रिया-बहुवचनम्



लिखति


लिखन्ति


पठति


पठन्ति



गच्छति


गच्छन्ति


नृत्यति


नृत्यन्ति


बालकः खादति


बालकाः खादन्ति


महिला गायति


महिलाः गायन्ति




छात्रः नमति



छात्राः नमन्ति



किशोरः धावति




किशोराः धावन्ति।

उदाहरणानुसारं वाक्यानि परिवर्तयन्तु

1. युवकः चित्रं पश्यति। युवकाः चित्रं पश्यन्ति।
2. बालिका कुर्दति। .....
3. अध्यापकः पाठयति। .....
4. जननी भोजनं पचति। .....
5. तरुणः धावति। .....
6. युवराजः मन्दिरं गच्छति। .....
7. चोरः धनिकस्य गृहे प्रविशति। .....
8. वानरः फलं खादति। .....



हसामि




हसामः




खादामि



खादामः




पिबामि




पिबामः



चलामि



चलामः



अहं लिखामि




वयं लिखामः



अहं पाठयामि



वयं पाठयामः



अहं पूजयामि



वयं पूजयामः




अहं गायामि




वयं गायामः

उदाहरणानुसारं वाक्यानि परिवर्तयन्तु


1. अहं प्रतिदिनं भ्रमामि। — वयं प्रतिदिनं भ्रमामः।
2. अहं देहलीं गच्छामि। — .....
3. अहं चित्रं पश्यामि। — .....
4. अहं मञ्चे नृत्यामि। — .....
5. अहं विद्यालये पाठयामि। — .....
6. अहम् आसन्दे उपविशामि। — .....
7. अहं पञ्चवादने उत्तिष्ठामि। — .....
8. अहं लेखं लिखामि। — .....
9. अहं गीतं गायामि। — .....
10. अहं दुग्धं पिबामि। — .....



गच्छतु



गच्छन्तु



पठतु



पठन्तु



चलतु



चलन्तु



पश्यतु



पश्यन्तु




भवान् लिखतु



भवन्तः लिखन्तु



बालकः खादतु



बालकाः खादन्तु



बालः उत्तिष्ठतु



बालाः उत्तिष्ठन्तु



छात्रः प्रविशत



छात्राः प्रविशन्तु

उदाहरणानुसारं वाक्यानि परिवर्तयन्तु

1. बाला गृहं गच्छतु। — बालाः गृहं गच्छन्तु।
2. छात्रः पाठं पठतु। — .....।
3. गणेशः अत्र आगच्छतु। — .....।
4. भवान् तत्र पश्यतु। — .....।
5. भवती गीतं गायतु। — .....।
6. भवती नृत्यतु। — .....।
7. सः निबन्धं लिखतु। — .....।
8. एषः मेषं नयतु। — .....।

चित्रसम्भाषणं पठन्तु



(सुप्रभातम्)



(स्वागतम्,
आगच्छतु)



(उपविशतु)

(धन्यवादः)



(सर्वं कुशलं वा?)



(आम्, सर्वं कुशलम्)



(दुग्धं स्वीकरोतु)
(किञ्चिद् स्वीकरोतु)




(मास्तु)
(अस्तु, ददातु)



(शर्करा अधिका
अस्ति खलु)



(चिन्ता मास्तु)



(पुनर्मिलामः)




(अस्तु, अहं
गच्छामि,
नमस्कारः)

द्वादशः पाठः

द्वितीयाविभक्तिः (पुंलिङ्गे, नपुंसकलिङ्गे)



छात्रः




ग्रन्थः




छात्रः **ग्रन्थं** पठति



भक्तः




शिवः



भक्तः **शिवम्** अर्चति।



महिला




घटः



महिला **घटं** पूरयति।



वानरः



फलम्



वानरः **फलं** खादति।

निम्नशब्दानां द्वितीयाविभक्तेः रूपाणि लिखन्तु

यथा-

1.	मार्गः	मार्गम्	11.	जलम्	जलम्
2.	छात्रः	.....	12.	फलम्	.....
3.	गायकः	.....	13.	पुस्तकम्	.....
4.	भारः	.....	14.	व्यजनम्	.....
5.	गर्दभः	.....	15.	पत्रम्	.....
6.	छात्रावासः	.....	16.	पर्णम्	.....
7.	कृषकः	.....	17.	पुष्पम्	.....
8.	ग्रामः	.....	18.	चित्रम्	.....
9.	कार्यालयः	.....	19.	यानम्	.....
10.	ग्रन्थालयः	.....	20.	वाहनम्	.....

अरविन्दः अहं	आपणः कार्यालयः चिकित्सालयः विद्यालयः इन्दौरम् जयपुरम् देहलीनगरम्	गच्छति गच्छामि

कोष्टकाधारेण उदाहरणानुगुणं वाक्यानि रचयन्तु-

यथा- अरविन्दः आपणं गच्छति।

अहम् आपणं गच्छामि।

.....

.....

.....

.....

.....

उदाहरणातुगुणं वाक्यानि लिखन्तु

यथा- 1. गर्दभः (भारः) वहति। — गर्दभः **भारं** वहति।

2. भिक्षुकः (बौद्धविहारः) गच्छति। — .....।

3. धनिकः (वित्तकोषः) गच्छति। — .....।

4. महिला (घटः) नयति। — .....।

5. वैद्यः (रुग्णः) पश्यति। — .....।

6. जनकः (पुत्रः) आह्वति। — .....।

7. सिंहः (वनम्) गच्छति। — .....।

8. नागरिकाः (नगरम्) गच्छन्ति। — .....।


9. पाठकाः (पुस्तकम्) पठन्ति। — .....।

10. महिलाः (व्यजनम्) चालयन्ति। — .....।

(द्वितीयाविभक्तिः) (स्त्रीलिङ्गे)



रञ्जनः




पाठशाला



रञ्जनः पाठशालां गच्छति।




भारवाहकः



पेटिका



भारवाहकः पेटिकां वहति।



बालकः




देवी



बालकः देवीम् अर्चति।



बाला



कूपी



बाला कूपीं स्वीकरोति।

निम्नशब्दानां द्वितीयाविभक्तेः रूपाणि लिखन्तु -

यथा-	1.	माला	मालाम्	11.	नदी	नदीम्
	2.	कलिका	कलिकाम्	12.	घटी	घटीम्
	3.	लता	.....	13.	नर्तकी	.....
	4.	पत्रिका	.....	14.	लेखनी	.....
	5.	मक्षिका	.....	15.	अङ्कनी	.....
	6.	पेटिका	.....	16.	द्रोणी	.....
	7.	गीता	.....	17.	मालिनी	.....
	8.	अजा	.....	18.	सूची	.....
	9.	पुस्तिका	.....	19.	कर्तरी	.....
	10.	लेखिका	.....	20.	हरिणी	.....

	मथुरा	
	अयोध्या	
	माया	
महेन्द्रः	अवन्तिका	गच्छति
अहम्	काशी	गच्छामि
	काञ्ची	
	पुरी	

कोष्टकाधारेण उदाहरणानुगुणं वाक्यानि रचयन्तु -

यथा- 1. महेन्द्रः मथुरां गच्छति। अहं मथुरां गच्छामि।

2. .....। .....।

3. .....। .....।

4. .....। .....।

5. .....। .....।

6. .....। .....।

7. .....। .....।

8. .....। .....।

9. .....। .....।

10. .....। .....।

उदाहरणानुगुणं वाक्यानि लिखन्तु

1. जननी (रोटिका) पचति। जननी **रोटिकां** पचति।

2. बालिका (भगवद्गीता) पठति। .....।

3. शीला (कथा) श्रुणोति। .....।

4. भवान् (कलिका) चिनोति। .....।

5. कविः (कविता) लिखति। .....।

6. भवती (सङ्गीतविद्या) पठति। .....।

7. छात्रः (कौमुदी) पठति। .....।


8. शिक्षकः (लेखनी) ददाति। .....।

9. दिनेशः (नर्तकी) पश्यति। .....।

10. बालकः (प्रदर्शिनी) पश्यति। .....।

त्रयोदशः पाठः

पुरतः, पृष्ठतः, वामतः, दक्षिणतः, अपरि, अधः



चित्रं दृष्ट्वा अधस्तनवाक्यानि अवधानेन परिशीलयतु

तत् गृहम्।

गृहस्य पुरतः मार्गः अस्ति।

गृहस्य पृष्ठतः नदी अस्ति।


गृहस्य वामतः मन्दिरम् अस्ति।

गृहस्य दक्षिणतः वृक्षः अस्ति।


मन्दिरस्य उपरि कलशः अस्ति।

वृक्षस्य अधः कपोतः अस्ति।

चित्रं दृष्ट्वा वाक्यानि शुद्धानि वा अशुद्धानि वा इति चिह्नाङ्कितं करोतु :-



1. गृहस्य उपरि चटकः अस्ति। ☐
2. वृक्षस्य अधः वानरः अस्ति। ☐
3. जनस्य पुरतः धेनुः अस्ति। ☐
4. वृक्षस्य उपरि फलानि सन्ति। ☐
5. वृक्षस्य अधः कुक्कुटः अस्ति। ☐
6. जनस्य पृष्ठतः गृहम् अस्ति। ☐
7. जनस्य वामतः गृहम् अस्ति। ☐




चित्रं दृष्ट्वा उपरि, अधः पुरतः, पुरतः, पृष्ठतः वामतः, दक्षिणतः इत्येतेषाम् उपयोगं कृत्वा वाक्यानि रचयन्तु।

1. .....
2. .....
3. .....
4. .....
5. .....
6. .....
7. .....
8. .....
9. .....
10. .....

(इतः, ततः)

(रेलस्थानकम्)



चित्रं दृष्ट्वा सम्भाषणं पठन्तु

सानिध्यः मित्र! एतत् रेलयानं कुतः आगच्छति?

सङ्केतः एतत् रेलयानं देहलीतः आगच्छति।

सानिध्यः इतः कुत्र गच्छति?

सङ्केतः इतः इन्दौरं गच्छति।

सानिध्यः ततः कदा आगमिष्यति?

सङ्केतः ततः श्वः आगमिष्यति।

सानिध्यः रेलस्थानके बहवः जनाः वृथा किं कुर्वन्ति?


सङ्केतः मित्र! एते इतस्ततः अटन्ति।

अधस्तने गद्यांशे रिक्तस्थानेषु (इतः, ततः, तः) मञ्जूषातः शब्दं पूरयतु-

देवेन्द्र! अद्य देहलीं ..... अत्र आगच्छति। श्वः जगन्नाथपुरीं गमिष्यति। आगामी सप्ताहे पुनः अत्र आगत्य..... नागपुरं गमिष्यति। सम्पूर्णे मासे सः एवमेव ..... अटनं करिष्यति।

अवधेयम्

अत्रतः	×	इतः	✓
तत्रतः	×	ततः	✓
कुत्रतः	×	कुतः	✓
उपरितः	×	उपरिष्टात्	✓



आशीषः उज्जयिनी तः प्रस्थाय मध्यप्रदेशस्य प्रवासं करोति। सः कुतः कुत्र गच्छति इति लिखन्तु

यता- आशीषः **उज्जयिनीतः** ग्वालियरं गच्छति।

.....

.....

.....

.....

.....

.....

.....

उदाहरणानुगुणं वाक्यानि लिखन्तु

यथा -

1. भटः (अश्वः) पतति। भटः **अश्वतः** पतति।
2. कृषकः (ग्रामः) आगच्छति। .....।
3. महिला (पाकशाला) आगच्छति। .....।
4. फलानि (वृक्षः) पतन्ति। .....।
5. माता (मन्दिरम्) आगच्छति। .....।
6. सीता (अयोध्या) वनं गच्छति। .....।
7. भूपेन्द्रः (रेवा) देहलीं गच्छति। .....।
8. सन्दीपः (कार्यालयः) विद्यालयं गच्छति। .....।
9. महेन्द्र (इन्दौरम्) खण्डवां गच्छति। .....।
10. शीला (नदी) गृहम् आगच्छति। .....।

चतुर्दशः पाठः

शीघ्रम, मन्दम्

वाक्यानि अवधानेन परिशीलयन्तु

1. अश्वः **शीघ्रं** चलति।
2. कच्छपः **मन्दं** चलति।
3. वृद्धः **मन्दं** चलति।
4. युवकः **शीघ्रं** चलति।

रिक्तस्थानेषु (शीघ्रं वा मन्दं) पूरयन्तु

1. सिंहः ..... चलति।
2. वायुयानं ..... उड्डयते।
3. गजः ..... गच्छति।
4. वृषभशकटं ..... चलति।
5. स्थूलः ..... धावति।
6. कृशः ..... धावति।

उच्चैः शनैः

अवधानेन वाक्यानि परिशीलयन्तु

1. सिंहः **उच्चैः** गर्जति।
2. बालिका **शनैः** गायति।
3. गजः **उच्चैः** गर्जति।
4. शशकः **शनैः** वदति।

रिक्तस्थानेषु (उच्चैः वा शनैः) पूरयन्तु

1. मल्लः ..... हसति।
2. अजा ..... वदति।
3. धेनुः ..... रभति।
4. वृषभः ..... रभति।
5. चटका ..... कूजति।
6. मयूरः ..... ध्वनिं करोति।

कथम्, सम्यक्

वाक्यानि परिशीलयन्तु

1. सिंहः कथं गर्जति? — सिंह उच्चैः गर्जति।
2. अश्वः कथं धावति? — अश्वः शीघ्रं धावति।
3. लता मङ्गेशकरः कथं गायति? — लता मङ्गेशकरः **सम्यक्** गायति।
4. वातावरणं कथम् अस्ति? — वातावरणं **सम्यक्** अस्ति।

एतेषां प्रश्नानाम् उत्तरं लिखन्तु

1. भीमसेनजोशी कथं गायति? .....
2. दिनेशः कथं धावति? .....
3. नर्तकी कथं नृत्यति? .....
4. यानं कथं चलति? .....
5. पठनं कथं चलति? .....

एतेषाम् उत्तराणां प्रश्नं लिखन्तु

1. मोहनः सम्यक् क्रीडति। .....?
2. छात्रः सम्यक् पठति। .....?
3. बालिका सम्यक् धावति। .....?
4. चालकः सम्यक् चालयति। .....?
5. अहं सम्यक् अस्मि। .....?

किमर्थम्

वाक्यानि परिशीलयन्तु

- छात्रः किमर्थं विद्यालयं गच्छति?
  छात्रः पठनार्थं विद्यालयं गच्छति।
- जनाः किमर्थं दूरदर्शनं पश्यन्ति?
  जनाः मनोरञ्जनार्थं दूरदर्शनं पश्यन्ति।

प्रदत्तशब्दद्वयम् उपयुज्य प्रश्नम् उत्तरं च लिखन्तु

यथा- चिकित्सालयम्/औषधार्थम्
सः किमर्थं चिकित्सालयं गच्छति?
सः औषधार्थं चिकित्सालयं गच्छति।

1. योगासनम्/ स्वास्थ्यलाभार्थम्
   .....
   .....
2. देशान्तरम्/ प्रवासार्थम्
   .....
   .....

3. भोजनालयम्/भोजनार्थम्

.....

.....

4. मन्दिरम्/पूजनार्थम्

.....

.....

पञ्चदशः पाठः

सप्तककाराः


किम्	कुत्र	कदा	कति
कुतः	कथम्	किमर्थम्	

उदाहरणानुसारं प्रश्नान् लिखन्तु

रमणः किं पठति?	रमणः पुस्तकं पठति।
.....?	सीता चित्रं पश्यति।
.....?	शिक्षकः प्रश्नं पृच्छति।
.....?	धनिकः धनं ददाति।
.....?	आपणिकः वस्त्रं यच्छति।
.....?	छात्रः लेखनीं ददाति।
ताजमहल्, कुत्र अस्ति?	ताजमहल् आगरानगरे अस्ति।
.....?	विश्वनाथः काशीनगरे अस्ति।
.....?	संस्कृतग्रामः रायगढ़े अस्ति।
.....?	चन्द्रः आकाशे अस्ति।
.....?	पुष्पम् वृक्षे अस्ति।
सूर्योदयः कदा भवति?	सूर्योदयः प्रातः काले भवति।
.....?	छात्रः सप्तवादने पठति।
.....?	परीक्षा अप्रैलमासे भवति।
.....?	गीता सायङ्काले पठति।
.....?	कमलं प्रातः काले विकसति।
.....?	कुक्कुटः प्रभाते वदति।

हस्ते कति अङ्गुल्यः सन्ति?	हस्ते दशाङ्गुल्यः सन्ति।
.....?	वृक्षे विंशतिः फलानि सन्ति।
.....?	वर्षे द्वादशमासाः भवन्ति।
.....?	सप्ताहे सप्तदिनानि भवन्ति।
.....?	दिनेशस्य पञ्चभ्रातरः सन्ति।
गङ्गा कुतः प्रभवति	गङ्गा हिमालयतः प्रभवति।
.....?	छात्रः विद्यालयतः आगच्छति।
.....?	जनकः गृहतः गच्छति।
.....?	रमेशः इन्दौरतः वदति।
.....?	भगिनी कार्यालयतः आगच्छति।
.....?	फलानि वृक्षतः पतन्ति।
शास्त्रीयनृत्यं कथम् अस्ति?	शास्त्रीयनृत्यं सम्यक् अस्ति।
.....?	जनकस्य स्वास्थ्यं सम्यक् अस्ति।
.....?	पठनं सम्यक् चलति।
.....?	गीता सम्यक् गायति।
.....?	नायकः सम्यक् वदति।
.....?	नायिका सम्यक् नृत्यति।
जनाः किमर्थं वित्तकोषं गच्छन्ति?	जनाः धनव्यवहारार्थं वित्तकोषं गच्छन्ति।
.....?	बालकाः क्रीडनार्थं गच्छति।
.....?	जनकः पठनार्थं वदति।
.....?	यात्री भ्रमणार्थं गच्छति।
.....?	भिक्षुकः भोजनार्थं याचते।
.....?	सेवकः धनार्थं कार्यं करोति।

(अपि)



युवकः चषकं स्वीकरोति

युवकः चषकं स्वीकरोति कूपीम् अपि स्वीकरोति।

रिक्तस्थानानि पूरयन्तु

1. बालकः विद्यालयं गच्छति, पुस्तकालयम् ..... गच्छति।
2. राजेशः चित्रं पश्यति, चित्रकारम् ..... पश्यति।
3. अहं श्रीनगरं गच्छामि, कटराम् ..... गच्छामि।
4. कृष्णः मथूरायां भवति, द्वारिकायाम् ..... भवति।
5. रामः रावणं मारितवान्, कुम्भकर्णम् ..... मारितवान्।

'अपि' शब्दम् उपयुज्य वाक्यानि रचयन्तु

.....।

.....।

.....।

.....।

.....।

.....।

.....।

.....।

.....।

.....।

.....।

षोडशः पाठः

क्तवतु (भूतकालः)

अवधानेन पठन्तु

- अमरेन्द्रः अद्य इन्द्रपुरं गच्छति।
  अमरेन्द्रः ह्यः जोधपुरं **गतवान्।**
- कौशलः एतस्मिन् वर्षे भोपाले पठति।
  कौशलः गतवर्षे नागपुरे **पठितवान्।**
- छात्राः एतस्मिन् वर्षे सप्तमीकक्षायां पठन्ति।
  छात्राः गतवर्षे षष्ठीकक्षायां **पठितवन्तः।**
- युवकाः भोजनं कुर्वन्ति।
  युवकाः इतः पूर्वं स्नानं **कृतवन्तः।**

रिक्तानिस्थलानि पूरयन्तु

पुल्लिङ्गे

	एकवचनम्	**बहुवचनम्**
पठति	पठितवान्	पठितवन्तः
पतति	पतित.....	.....
पश्यति	दृष्ट.....	.....
नयति	नीत.....	.....
पृच्छति	पृष्ट.....	.....
जानाति	ज्ञात.....	.....
ददाति	दत्त.....	.....
उत्तिष्ठति	उत्थित.....	.....
खादति	खादित.....	.....
शक्नोति	शक्त.....	.....

अवधानेन पठन्तु

- माता अद्य मन्दिरं गच्छति।
  माता ह्यः मन्दिरं गतवती।
- दीक्षा अस्मिन् वर्षे अष्टम्यां पठति।
  दीक्षा गतवर्षे सप्तम्यां पठितवती।
- अध्यापिकाः अस्मिन् मासे चायं पिबन्ति।
  अध्यापिकाः गतमासे दुग्धं पीतवत्यः।

रिक्तानि स्थलानि पूरयन्तु

स्त्रीलिङ्गे

	एकवचनम्	बहुवचनम्
लिखति	लिखतवती	लिखितवत्यः
गच्छति	गत.....	.....
हसति	हसित.....	.....
पतति	पतित.....	.....
वदति	उक्त.....	.....
उपविशति	उपविष्ट.....	.....
करोति	कृत.....	.....
ददाति	दत्त.....	.....
नयति	नीत.....	.....
गायति	गीत.....	.....
वादयति	वादित.....	.....

अवधेयम्

अस्ति-आसीत्	अस्मि-आसम्
सन्ति- आसन्	स्मः-आस्म
भवति - अभवत्	भवन्ति- अभवन्

एतां कथां पठन्तु

एकः बालकः **अस्ति**। सः प्रतिदिनं विद्यालयं समयेन न **गच्छति**। एकवारं सः वाटिकां **गच्छति**। तत्र एकं चटकं **पश्यति**। सः चटकं क्रीडार्थम् **आकारयति**। चटकः **वदति** मम समीपे, समयः नास्ति। अनन्तरं सः एकां मधुमक्षिकां **पश्यति**। तां क्रीडार्थम् **आकारयति**। सा मधुमक्षिका अपि **वदति**- मम समीपे समयः नास्ति। एवं सर्वे **वदन्ति** 'समयः नास्ति'। एतत् दृष्ट्वा तस्य लज्जा **भवति**। अनन्तरं सः समयेन विद्यालयं **गच्छति**।

उपरि कथायाम् स्थूलाक्षरैः निर्दिष्टानां शब्दानां भूतकालरूपाणि अधस्तनकथायां लिखन्तु।

एकः बालकः .....! सः प्रतिदिनं विद्यालयं समयेन न ..... । एकवारं सः वाटिकां.....। तत्र एकं चटकं .....। सः चटकं क्रीडार्थम् .....। चटकः ..... मम समीपे समयः नास्ति। अनन्तरं सः एकां मधुमक्षिकां .....। तां क्रीडार्थम् .....। सा मधुमक्षिका अपि.....। समयः नास्ति। एवं सर्वे ..... 'समयः नास्ति'। एतत् दृष्ट्वा तस्य लज्जा .....। अनन्तरं सः समयेन विद्यालयं .....।

सप्तदशः पाठः

भविष्यत्कालः (प्रथमपुरुषे)

अवधानेन वाक्यानि परिशीलयन्तु

- गगनः प्रातःकाले भोजनं कृतवान्।
  गगनः रात्रिकाले भोजनं **करिष्यति।**
- जगदीशः अधुना शास्त्री अन्तिमवर्षे पठति।
  जगदीशः आगामीवर्षे आचार्यकक्षायां **पठिष्यति।**
- बालकाः दशमीकक्षायां पठन्ति।
  बालकाः एकादशीकक्षायां **पठिष्यन्ति।**
- महिलाः प्रातःकाले भोजनं कृतवत्यः।
  महिलाः रात्रिकाले भोजनं **करिष्यन्ति।**

